# 2022

## 5th Semester Examination

## SANSKRIT (Honours)

### Paper : C 11-T

### [Vedic Literature]

[CBCS]

Full Marks : 60 Time : 3 Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

1. अधोलिखितेषु यथेच्छं दश प्रश्नाः समाधेया : 2×10=20

(क) अग्निसूक्तस्य कः ऋषिः ? अस्मिन् सूक्ते कति मन्त्राः सन्ति ?

(ख) को नाम प्रातरनुवाकः ?

(ग) का नाम पुरोऽनुवाक्या ? का च याज्या ?

(घ) 'रयिम्' इति पदस्य, 'वीरवत्तमम्' इति पदस्य च अर्थं लिखत।

(ङ) 'स्तोमं जुषस्व' इत्यत्र स्तोमपदेन किं बुध्यते ? कामुद्दिश्य एवं प्रार्थना क्रियते ?

(च) 'पुराणी', 'विश्ववारे' इति पदयोः कः अर्थः ?

(छ) अक्षसूक्तस्य कः ऋषिः ? अस्मिन् सूक्ते कति छन्दांसि सन्ति ?

(ज) कितवस्य श्वश्रूः कथं द्वेष्टि ? कः कितवम् अपरुणद्धि ?

(झ) 'अक्षैर्मा दीव्यः कृषिमित्कृषस्व' इत्यस्य वेदवाक्यस्य अर्थं लिखत।

(ञ) हिरण्यगर्भसूक्तस्य का देवता ? किं च छन्दः ?

(ट) 'यस्य छायामृतं यस्य मृत्युः' इत्यस्य अर्थं लिखत।

(ठ) मनः कथं ज्योतिषां ज्योतिः उच्यते ?

(ड) मनः कथममृतम् उच्यते ?

(ढ) पृथिवीं के धारयन्ति ?

(ण) 'यस्याश्चतस्रः प्रदिशः' इत्यत्र कस्याः स्तुतिः क्रियते ? 'प्रदिशः' इति पदेन किं बुध्यते ?

2. अधः प्रदत्तेषु यथेच्छं **चत्वारः** प्रश्नाः समाधेया : 5×4=20

(क) अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒-

री॒ड्यो॒ नूत॑नैरु॒त।

स दे॒वाँ एह व॑क्षति।।—इत्यस्य मन्त्रस्य ऋषिच्छन्दोदेवता-निर्देशपुरः सरं व्याख्यां लिखत।

(ख) अग्नीषोमप्रणयन 'उप त्वाग्ने' इत्यादिकोऽनुवचनीयस्तृचः—इत्यस्य विनियोगवाक्यस्य व्याख्यां लिखत।

(ग) स नः॑ 'पि॒तेव॑' सू॒नवे॑—

ऽग्ने॑ सूपाय॒नो भ॑व

सच॑स्वा नः स्व॒स्तये॑।।



—इत्यस्य मन्त्रस्य पदपाठं कृत्वा यथेच्छं पदद्वयस्य स्वरसाधनं कुरुत।

(घ) शिवसंकल्पसूक्तानुसारं मनसः स्वरुपं संक्षेपेण व्याख्येयम्।

(ङ) तपसा चीयते ब्रह्म ततोऽन्नमभिजायते।

अन्नात् प्राणो मनः सत्यं लोकाः कर्म्मसु चामृतम्।।

—इत्यस्य मन्त्रस्य व्याख्यां लिखत।

(च) 'अनुदात्तौ सुप्पितौ', 'आज्जसेरसुक' इत्यनयोः सूत्रयोः प्रयोगोदाहरणं प्रदाय सूत्रसंगतिं प्रदर्शय।

3. अधोलिखितेषु यथेच्छं ***प्रश्नद्वयं*** समाधेयम् : 10×2=20

(क) मुण्डकोपनिषदि प्रतिपादितं विद्यास्वरूपं समासेन व्याख्याय आत्मविद्यायाः माहात्म्यं विवृणुत।

(ख) किं नाम दार्शनिकसुक्तम् ? हिरण्यगर्भसूक्तस्य दार्शनिकतत्त्वं समासेन वर्ण्यताम्।

(ग) अग्निदेवतायाः माहात्म्यम् ऋग्वेदे यथा वर्णितं तथा समासेन प्रतिपाद्यताम्।

(घ) वैदिकवाङ्मये लेट्-लकारस्य प्रयोगमाश्रित्य वैशद्येन वर्णनं कुरुत।